# advaitanubhuti

# અદ્વૈતાનુભૂતિ

## Document Information

Text title : Advaitanubhuti

File name : advaitanubhuti.itx

Category : vedanta, shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : In 84 verses

Latest update : November 21, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2020

*sanskritdocuments.org*

# અદ્વૈતાનુભૂતિ

॥ શ્રીઃ ॥

॥ અદ્વૈતાનુભૂતિઃ ॥

અહમાનન્દસત્યાદિલક્ષણઃ કેવલઃ શિવઃ ।
સદાનન્દાદિરૂપં યત્તેનાહમચલોઽદ્વયઃ ॥૧॥

અક્ષિદોષાદ્યથૈકોઽપિ દ્વયવદ્ભાતિ ચન્દ્રમાઃ ।
એકોઽપ્યાત્મા તથા ભાતિ દ્વયવન્માયયા મૃષા ॥૨॥

અક્ષિદોષવિહીનાનામેક એવ યથા શશી ।
માયાદોષવિહીનાનામાત્મૈવૈકસ્તથા સદા ॥૩॥

દ્વિત્વં ભાત્યક્ષિદોષેણ ચન્દ્રે સ્વે માયયા જગત્ ।
દ્વિત્વં મૃષા યથા ચન્દ્રે મૃષા દ્વૈતં તથાત્મનિ ॥૪॥

આત્મનઃ કાર્યમાકાશો વિનાત્માનં ન સંભવેત્ ।
કાર્યસ્ય પૂર્ણતા સિદ્ધા કિં પુનઃ પૂર્ણતાત્મનઃ ॥૫॥

કાર્યભૂતો યથાકાશ એક એવ ન હિ દ્વિધા ।
હેતુભૂતસ્તથાત્માયમેક એવ વિજાનતઃ ॥૬॥

એકોઽપિ દ્વયવદ્ભાતિ યથાકાશ ઉપાધિતઃ ।
એકોઽપિ દ્વયવત્પૂર્ણસ્તથાત્માયમુપાધિતઃ ॥૭॥

કારણોપાધિચૈતન્યં કાર્યસંસ્થાચ્ચિતોઽધિકમ્ ।
ન ઘટાભ્રાન્મૃદાકાશઃ કુત્રચિન્નાધિકો ભવેત્ ॥૮॥

નિર્ગતોપાધિરાકાશ એક એવ યથા ભવેત્ ।
એક એવ તથાત્માયં નિર્ગતોપાધિકઃ સદા ॥૯॥

આકાશાદન્ય આકાશ આકાશસ્ય યથા ન હિ ।
એકત્વાદાત્મનો નાન્ય આત્મા સિધ્યતિ ચાત્મનઃ ॥૧૦॥

મેઘયોગાદ્યથા નીરં કરકાકારતામિયાત્ ।
માયાયોગાત્તથૈવાત્મા પ્રપઞ્ચાકારતામિયાત્ ॥૧૧॥

વર્ષોપલ ઇવાભાતિ નીરમેવાભ્રયોગતઃ ।
વર્ષોપલવિનાશેન નીરનાશો યથા ન હિ ॥૧૨॥

આત્મૈવાયં તથા ભાતિ માયાયોગાત્પ્રપઞ્ચવત્ ।
પ્રપઞ્ચસ્ય વિનાશેન સ્વાત્મનાશો ન હિ ક્વચિત્ ॥૧૩॥

જલાદન્ય ઇવાભાતિ જલોત્થો બુદ્બુદો યથા ।
તથાત્મનઃ પૃથગિવ પ્રપઞ્ચોઽયમનેકધા ॥૧૪॥

યથા બુદ્બુદનાશેન જલનાશો ન કર્હિચિત્ ।
તથા પ્રપઞ્ચનાશેન નાશઃ સ્યાદાત્મનો ન હિ ॥૧૫॥

અહિનિર્લ્વયનીજાતઃ શુચ્યાદિર્નાહિમાપ્નુયાત્ ।
તથા સ્થૂલાદિસંભૂતઃ શુચ્યાદિર્નાપ્નુયાદિમમ્ ॥૧૬॥

ત્યક્તાં ત્વચમહિર્યદ્વદાત્મત્વેન ન મન્યતે ।
આત્મત્વેન સદા જ્ઞાની ત્યક્તદેહત્રયં તથા ॥૧૭॥

અહિનિર્લ્વયનીનાશાદહેર્નાશો યથા ન હિ ।
દેહત્રયવિનાશેન નાત્મનાશસ્તથા ભવેત્ ॥૧૮॥

તક્રાદિલવણોપેતમજ્ઞૈર્લવણવદ્યથા ।
આત્મા સ્થૂલાદિસંયુક્તો દૃશ્યતે સ્થૂલકાદિવત્ ॥૧૯॥

અયઃકાષ્ઠાદિકં યદ્વદ્વહ્નિવદ્વહ્નિયોગતઃ ।
ભાતિ સ્થૂલાદિકં સર્વમાત્મવત્સ્વાત્મયોગતઃ ॥૨૦॥

દાહકો નૈવ દાહ્યં સ્યાદ્દાહ્યં તદ્વન્ન દાહકઃ ।
નૈવાત્માયમનાત્મા સ્યાદનાત્માયં ન ચાત્મકઃ ॥૨૧॥

પ્રમેયાદિત્રયં સાર્થં ભાનુના ઘટકુડ્યવત્ ।
યેન ભાતિ સ એવાહં પ્રમેયાદિવિલક્ષણઃ ॥૨૨॥

ભાનુસ્ફુરણતો યદ્વત્સ્ફુરતીવ ઘટાદિકમ્ ।
સ્ફુરતીવ પ્રમેયાદિરાત્મસ્ફુરણતસ્તથા ॥૨૩॥

પિષ્ટાદિગુલસમ્પર્કાદ્ગુલવત્પ્રીતિમાન્યથા ।

આત્મયોગાત્પ્રમેયાદિરાત્મવત્પ્રીતિમાન્ભવેત્ ॥ ૨૪ ॥

ઘટનીરાન્નપિષ્ટાનામુષ્ણત્વં વહ્નિયોગતઃ ।
વહ્નિં વિના કથં તેષામુષ્ણતા સ્યાદ્યથા ક્વચિત્ ॥ ૨૫ ॥

ભૂતભૌતિકદેહાનાં સ્ફૂર્તિતા સ્વાત્મયોગતઃ ।
વિનાત્માનં કથં તેષાં સ્ફૂર્તિતા સ્યાત્તથા ક્વચિત્ ॥ ૨૬ ॥

નાનાવિધેષુ કુમ્ભેષુ વસત્યેકં નભો યથા ।
નાનાવિધેષુ દેહેષુ તદ્વદેકો વસામ્યહમ્ ॥ ૨૭ ॥

નાનાવિધત્વં કુમ્ભાનાં ન યાત્યેવ યથા નભઃ ।
નાનાવિધત્વં દેહાનાં તદ્વદેવ ન યામ્યહમ્ ॥ ૨૮ ॥ (નયામ્યહમ્)

યથા ઘટેષુ નષ્ટેષુ ઘટાકાશો ન નશ્યતિ ।
તથા દેહેષુ નષ્ટેષુ નૈવ નશ્યામિ સર્વગઃ ॥ ૨૯ ॥

ઉત્તમાદીનિ પુષ્પાણિ વર્તન્તે સૂત્રકે યથા ।
ઉત્તમાદ્યાસ્તથા દેહા વર્તન્તે મયિ સર્વદા ॥ ૩૦ ॥

યથા ન સંસ્પૃશેત્સૂત્રં પુષ્પાણામુત્તમાદિતા ।
તથા નૈકં સર્વગં માં દેહાનામુત્તમાદિતા ॥ ૩૧ ॥

પુષ્પેષુ તેષુ નષ્ટેષુ યદ્વત્સૂત્રં ન નશ્યતિ ।
તથા દેહેષુ નષ્ટેષુ નૈવ નશ્યામ્યહં સદા ॥ ૩૨ ॥

પર્યઙ્કરજ્જુરન્ધ્રેષુ નાનેવૈકાપિ સૂર્યભા ।
એકોઽપ્યનેકવદ્ભાતિ તથા ક્ષેત્રેષુ સર્વગઃ ॥ ૩૩ ॥

રજ્જુરન્ધ્રસ્થદોષાદિ સૂર્યભાં ન સ્પૃશેદ્યથા ।
તથા ક્ષેત્રસ્થદોષાદિ સર્વગં માં ન સંસ્પૃશેત્ ॥ ૩૪ ॥

તદ્રજ્જુરન્ધ્રનાશેષુ નૈવ નશ્યતિ સૂર્યભા ।
તથા ક્ષેત્રવિનાશેષુ નૈવ નશ્યામિ સર્વગઃ ॥ ૩૫ ॥

દેહો નાહં પ્રદૃશ્યત્વાદ્ભૌતિકત્વાન્ન ચેન્દ્રિયમ્ ।
પ્રાણો નાહમનેકત્વાન્મનો નાહં ચલત્વતઃ ॥ ૩૬ ॥

બુદ્ધિર્નાહં વિકારિત્વાત્તમો નાહં જડત્વતઃ ।
દેહેન્દ્રિયાદિકં નાહં વિનાશિત્વાદ્ઘટાદિવત્ ॥ ૩૭ ॥

દેહેન્દ્રિયપ્રાણમનોબુદ્ધ્યજ્ઞાનાનિ ભાસયન્ ।
અહંકારં તથા ભામિ ચૈતેષામભિમાનિનમ્ ॥ ૩૮॥

સર્વં જગદિદં નાહં વિષયત્વાદિદંધિયઃ ।
અહં નાહં સુષુપ્ત્યાદૌ અહમઃ સાક્ષિતઃ સદા ॥ ૩૯॥

સુપ્તૌ યથા નિર્વિકારસ્તથાવસ્થાદ્વયેઽપિ ચ ।
દ્વયોર્માત્રાભિયોગેન વિકારીવ વિભામ્યહમ્ ॥ ૪૦॥

ઉપાધિનીલરક્તાદ્યૈઃ સ્ફટિકો નૈવ લિપ્યતે ।
તથાત્મા કોશજૈઃ સર્વૈઃ કામાદ્યૈર્નૈવ લિપ્યતે ॥ ૪૧॥

ફ઼ાલેન ભ્રામ્યમાણેન ભ્રમતીવ યથા મહી ।
અગોઽપ્યાત્મા વિમૂઢેન ચલતીવ પ્રદૃશ્યતે ॥ ૪૨॥

દેહત્રયમિદં નિત્યમાત્મત્વેનાભિમન્યતે ।
યાવત્તાવદયં મૂઢો નાનાયોનિષુ જાયતે ॥ ૪૩॥

નિદ્રાદેહજદુઃખાદિ જાગ્રદ્દેહં ન સંસ્પૃશેત્ ।
જાગ્રદ્દેહજદુઃખાદિસ્તથાત્માનં ન સંસ્પૃશેત્ ॥ ૪૪॥

જાગ્રદ્દેહવદાભાતિ નિદ્રાદેહસ્તુ નિદ્રયા ।
નિદ્રાદેહવિનાશેન જાગ્રદ્દેહો ન નશ્યતિ ॥ ૪૫॥

તથાયમાત્મવદ્ભાતિ જાગ્રદ્દેહસ્તુ જાગરાત્ ।
જાગ્રદ્દેહવિનાશેન નાત્મા નશ્યતિ કર્હિચિત્ ॥ ૪૬॥

હિત્વાયં સ્વાપ્નિકં દેહં જાગ્રદ્દેહમપેક્ષતે ।
જાગ્રદ્દેહપ્રબુદ્ધોઽયં હિત્વાત્માનં યથા તથા ॥ ૪૭॥

સ્વપ્નભોગે યથૈવેચ્છા પ્રબુદ્ધસ્ય ન વિદ્યતે ।
અસત્સ્વર્ગાદિકે ભોગે નૈવેચ્છા જ્ઞાનિનસ્તથા ॥ ૪૮॥

ભોક્ત્રા બહિર્યથા ભોગ્યઃ સર્પો દૃષદિ કલ્પિતઃ ।
રૂપશીલાદયશ્ચાત્મભોગા ભોગ્યસ્વરૂપકાઃ ॥ ૪૯॥

જ્ઞસ્ય નાસ્ત્યેવ સંસારો યદ્વદજ્ઞસ્ય કર્મિણઃ ।
જાનતો નૈવ ભીર્યદ્વદ્રજ્જુસર્પમજાનતઃ ॥ ૫૦॥

સૈન્ધવસ્ય ઘનો યદ્વજ્જલયોગાજ્જલં ભવેત્ ।
સ્વાત્મયોગાત્તથા બુદ્ધિરાત્મૈવ બ્રહ્મવેદિનઃ ॥ ૫૧॥

તોયાશ્રયેષુ સર્વેષુ ભાનુરેકોऽપ્યનેકવત્ ।
એકોऽપ્યાત્મા તથા ભાતિ સર્વક્ષેત્રેષ્વનેકવત્ ॥ ૫૨ ॥

ભાનોરન્ય ઇવાભાતિ જલભાનુર્જલે યથા ।
આત્મનોऽન્ય ઇવાભાસો ભાતિ બુદ્ધૌ તથાત્મનઃ ॥ ૫૩ ॥

બિમ્બં વિના યથા નીરે પ્રતિબિમ્બો ભવેત્કથમ્ ।
વિનાત્માનં તથા બુદ્ધૌ ચિદાભાસો ભવેત્કથમ્ ॥ ૫૪ ॥

પ્રતિબિમ્બચલત્વાદ્યા યથા બિમ્બસ્ય કર્હિચિત્ ।
ન ભવેયુસ્તથાऽऽભાસકર્તૃત્વાદ્યાસ્તુ નાત્મનઃ ॥ ૫૫ ॥ (ભવેયુસ્તથાભાસ)

જલે શૈત્યાદિકં યદ્વજ્જલભાનું ન સંસ્પૃશેત્ ।
બુદ્ધેઃ કર્માદિકં તદ્વચ્ચિદાભાસં ન સંસ્પૃશેત્ ॥ ૫૬ ॥

બુદ્ધેઃ કર્તૃત્વભોક્તૃત્વદુઃખિત્વાદ્યૈસ્તુ સંયુતઃ ।
ચિદાભાસો વિકારીવ શરાવસ્થામ્બુભાનુવત્ ॥ ૫૭ ॥

શરાવસ્થોદકે નષ્ટે તત્સ્થો ભાનુર્વિનષ્ટવત્ ।
બુદ્ધેર્લયે તથા સુપ્તૌ નષ્ટવત્પ્રતિભાત્યયમ્ ॥ ૫૮ ॥

જલસ્થાર્કં જલં ચોર્મિં ભાસયન્ભાતિ ભાસ્કરઃ ।
આત્માભાસં ધિયં બુદ્ધેઃ કર્તૃત્વાદીનયં તથા ॥ ૫૯ ॥

મેઘાવભાસકો ભાનુર્મેઘચ્છન્નોऽવભાસતે ।
મોહાવભાસકસ્તદ્વન્મોહચ્છન્નો વિભાત્યયમ્ ॥ ૬૦ ॥

ભાસ્યં મેઘાદિકં ભાનુર્ભાસયન્પ્રતિભાસતે ।
તથા સ્થૂલાદિકં ભાસ્યં ભાસયન્પ્રતિભાત્યયમ્ ॥ ૬૧ ॥

સર્વપ્રકાશકો ભાનુઃ પ્રકાશ્યેર્નૈવ દૂષ્યતે । (પ્રકાશ્યૈર્નૈવ)
સર્વપ્રકાશકો હ્યાત્મા સર્વૈસ્તદ્વન્ન દૂષ્યતે ॥ ૬૨ ॥

મુકુરસ્થં મુખં યદ્વન્મુખવત્પ્રથતે મૃષા ।
બુદ્ધિસ્થાભાસકસ્તદ્વદાત્મવત્પ્રથતે મૃષા ॥ ૬૩ ॥

મુકુરસ્થસ્ય નાશેન મુખનાશો ભવેત્કથમ્ ।
બુદ્ધિસ્થાભાસનાશેન નાશો નૈવાત્મનઃ ક્વચિત્ ॥ ૬૪ ॥

તામ્રકલ્પિતદેવાદિસ્તામ્રાદન્ય ઇવ સ્ફુરેત્ ।

પ્રતિભાસ્યાદિરૂપેણ તથાત્મોત્થમિદં જગત્ ॥ ૬૫॥

ઈશજીવાત્મવદ્ભાતિ યથૈકમપિ તામ્રકમ્ ।
એકોઽપ્યાત્મા તથૈવાયમીશજીવાદિવન્મૃષા ॥ ૬૬॥

યથેશ્વરાદિનાશેન તામ્રનાશો ન વિદ્યતે ।
તથેશ્વરાદિનાશેન નાશો નૈવાત્મનઃ સદા ॥ ૬૭॥

અધ્યસ્તો રજ્જુસર્પોઽયં સત્યવદ્રજ્જુસત્તયા ।
તથા જગદિદં ભાતિ સત્યવત્સ્વાત્મસત્તયા ॥ ૬૮॥

અધ્યસ્તાહેરભાવેન રજ્જુરેવાવશિષ્યતે ।
તથા જગદભાવેન સદાત્મૈવાવશિષ્યતે ॥ ૬૯॥

સ્ફટિકે રક્તતા યદ્વદુપાધેર્નીલતામ્બરે ।
યથા જગદિદં ભાતિ તથા સત્યમિવાદ્વયે ॥ ૭૦॥

સ્ફટિકે રક્તતા મિથ્યા મૃષા ખે નીલતા યથા ।
તથા જગદિદં મિથ્યા એકસ્મિન્નદ્વયે મયિ ॥ ૭૧॥

જીવેશ્વરાદિભાવેન ભેદં પશ્યતિ મૂઢધીઃ ।
નિર્ભેદે નિર્વિશેષેઽસ્મિન્કથં ભેદો ભવેદ્ધ્રુવમ્ ॥ ૭૨॥

લિઙ્ગસ્ય ધારણાદેવ શિવોઽયં જીવતાં વ્રજેત્ ।
લિઙ્ગનાશે શિવસ્યાસ્ય જીવતાવેશતા કુતઃ ॥ ૭૩॥

શિવ એવ સદા જીવો જીવ એવ સદા શિવઃ ।
વેત્ત્યૈક્યમનયોર્યસ્તુ સ આત્મજ્ઞો ન ચેતરઃ ॥ ૭૪॥

ક્ષીરયોગાદ્યથા નીરં ક્ષીરવદ્દૃશ્યતે મૃષા ।
આત્મયોગાદનાત્માયમાત્મવદ્દૃશ્યતે તથા ॥ ૭૫॥

નીરાત્ક્ષીરં પૃથક્કૃત્ય હંસો ભવતિ નાન્યથા ।
સ્થૂલાદેઃ સ્વં પૃથક્કૃત્ય મુક્તો ભવતિ નાન્યથા ॥ ૭૬॥

ક્ષીરનીરવિવેકજ્ઞો હંસ એવ ન ચેતરઃ ।
આત્માનાત્મવિવેકજ્ઞો યતિરેવ ન ચેતરઃ ॥ ૭૭॥

અધ્યસ્તચોરજઃ સ્થાણોર્વિકારઃ સ્યાન્ન હિ ક્વચિત્ ।
નાત્મનો નિર્વિકારસ્ય વિકારો વિશ્વજસ્તથા ॥ ૭૮॥

જ્ઞાતે સ્થાણૌ કુતશ્ચોરશ્ચોરાભાવે ભયં કુતઃ ।
જ્ઞાતે સ્વસ્મિન્કુતો વિશ્વં વિશ્વાભાવે કુતોઽખિલમ્ ॥ ૭૯ ॥

ગુણવૃત્તિત્રયં ભાતિ પરસ્પરવિલક્ષણમ્ ।
સત્યાત્મલક્ષણે યસ્મિન્સ એવાહં નિરંશકઃ ॥ ૮૦ ॥

દેહત્રયમિદં ભાતિ યસ્મિન્બ્રહ્મણિ સત્યવત્ ।
તદેવાહં પરં બ્રહ્મ દેહત્રયવિલક્ષણઃ ॥ ૮૧ ॥

જાગ્રદાદિત્રયં યસ્મિન્પ્રત્યગાત્મનિ સત્યવત્ ।
સ એવાહં પરં બ્રહ્મ જાગ્રદાદિવિલક્ષણઃ ॥ ૮૨ ॥

વિશ્વાદિકત્રયં યસ્મિન્પરમાત્મનિ સત્યવત્ ।
સ એવ પરમાત્માહં વિશ્વાદિકવિલક્ષણઃ ॥ ૮૩ ॥

વિરાડાદિત્રયં ભાતિ યસ્મિન્સાક્ષિણિ સત્યવત્ ।
સ એવ સચ્ચિદાનન્દલક્ષણોઽહં સ્વયંપ્રભઃ ॥ ૮૪ ॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
અદ્વૈતાનુભૂતિઃ સમ્પૂર્ણા ॥

---

*advaitanubhuti*

pdf was typeset on November 21, 2020

Please send corrections to *sanskrit@cheerful.com*